ISSN : 2348-5590

# EMERGING RESEARCHER

*Research for All*

*An International Research Refereed Journal Related to Law, Literature, Commerce, Science, Social Science, Management, Communication and Medical*

**Volume : 3 Issue : III July -September : 2016**

A Blind Peer Reviewed Quarterly Journal

Connect for New Research

**Patron :**

**Hon'ble Justice K.D. Shahi**
**Retd. High Court Judge**
**Allahabad, India**

**Prof. Saket Kushwaha**
**Vice Chancellor of**
**L. N. Mithila University, Darbhanga**
**Professor of Agricultural Science**
**Institute of Agriculture**
**Banaras Hindu University, Varanasi**
**India**

**Editor in Chief :**
Chandra Nath Singh
Law School
Banaras Hindu University
Varanasi, India

ISSN: 2348-5590

EMERGING RESEARCHER *(Research for All)*
**A Blind Peer Reviewed Quarterly Journal**
**Volume: 3 Issue: III July-September 2016**

**CONTENTS**


| | | |
|---|---|---|
| ✪ | ***Role of Teachers in Legal Education–An Analysis***<br>*Dr. B. K. Das* | 1-10 |
| ✪ | ***Convergence in Language Learners***<br>*Udoyan Banerji* | 11-14 |
| ✪ | ***Property Rights of Women under Hindu Personal Law: A Perspective***<br>*Nitendra Singh* | 15-20 |
| ✪ | ***Electoral Reforms in India***<br>*Kuldeep Narayan* | 21-27 |
| ✪ | ***Police Reforms in India***<br>*Sunil Kumar* | 28-35 |
| ✪ | ***Wild Life (Protection) Act, 1972: A Study with special References to 'Hunting of Animals'***<br>*Chandra Nath Singh* | 36-44 |
| ✪ | ***Social Responsibility of Media and Indian Democracy***<br>*Lokesh Chand* | 45-49 |
| ✪ | ***Media Laws: A Review***<br>*Shobhit Kumar Rastogi* | 50-56 |
| ✪ | ***Educational Aspiration of Dalit and Maha Dalit High School Students***<br>*Anjali Kumari* | 57-61 |
| ✪ | ***History of Party Formation in J&K, Emergence of PDP and its Impact on State Politics***<br>*Mehwish Bukhari* | 62-68 |
| ✪ | भारत में श्रमिक महिलाओं की स्थिति एवं समस्याएँ।<br>स्वाती कुमारी | 69-74 |
| ✪ | उपनिषद: दार्शनिकं चिन्तनम्<br>डॉ. किरण आर्या | 75-78 |
| ✪ | सृष्ट्युत्पत्ति" एक मीमांसा<br>मनु मिश्र | 79-84 |


✪✪✪

किरण आर्या

Emerging Researcher: Volume 3: Issue III: July-September 2016 ISSN : 2348-5590 

# उपनिषदः दार्शनिकं चिन्तनम्

डॉ. किरण आर्या*

**श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ संपरीत्य विविनक्ति धीरः।**
**श्रेयो हि धीरोऽभि प्रेयसो वृणीते प्रेयो मन्दात् योगक्षेमाद् वृणीते।।**[1]

औपनिषदकी संस्कृतिः मूलतः धर्मप्रधाना संस्कृतिर्विद्यते। धर्म–अर्थ–काम–मोक्ष इति पुरुषार्थचतुष्टयस्य कल्पना ऋषिभिः मनुष्याणां ऐहिकपारलौकिकयोः आध्यात्मिक–आधिभौतिकयोः पक्षयोरुभयोः सामञ्जस्याय विहिताऽसीत्। महर्षिकणादेन धर्मलक्षणमुदीर्य निर्दिष्टं यत् मानवस्य अर्थकामौ यदि प्रवृत्तिनिवृत्तिपरकधर्मद्वारा मर्यादितौ स्याताम् तर्हि मोक्षस्य प्राप्तिः स्वयमेव भवति। **यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः** इति सूत्रे

मानुषं दुर्लभं जन्म मानवयोनिः अतिदुर्लभा। सर्वासु योनिषु एषा योनिः सर्वोत्कृष्टा श्रेयस्करा च मन्यते। नैतावदेव एषा योनिः सृष्टिषु शोभनतमा निर्मितिः विद्यते –

**गुह्यं ब्रह्म तदिदं ब्रवीमि नहि मानुषात् श्रेष्ठतरं हि किंचित्।**[2]
**'पुरुषो वाव सुकृतम्'**[3]

जैविकस्तरे तु मनुष्यः मनुष्ययोनिं प्राप्तुं शक्नोति परं पुनरपि मनुष्यत्वार्जनाय महान् प्रयासः करणीयस्तेन भवति। अत एव वेदेषु पौनःपुन्येन **"मनुर्भव जनया दैव्यं जनम्"** हे मानव! त्वया मनुष्यः भवितव्यः इति प्रेरितम्। वितर्कः अत्र अयं भवति कथं मानवाय मानवभवनादेशः विधीयते? अस्य समाधानमनेन भवति –

**आहारनिद्राभयसन्ततित्वं सामान्यमेतत् पशुभिर्नराणाम्।**
**धर्मो हि तेषामधिको विशेषः धर्मेण हीनाः पशुभिस्समानाः।।**[4]

मनुष्यः एकः धारणशक्तिसम्पन्नः मननशीलः सृजनशीलः प्राणी विद्यते। मानवेतरयोनयस्तु भोगयोनयः विद्यन्ते जायस्व–म्रियस्व एषा एव तेषां नियतिः, स्थितिः। मानवयोनिः भोगयोनिना सह कर्मयोनिरपि विद्यते। आहार–निद्रा–भय–सन्तानोत्पत्तिस्तु सर्वेषां क्रिया, परं मनुष्यः अनया वृत्त्या उच्चस्थितिं प्राप्नुयात् अतः उच्यते 'मनुर्भव' अर्थात् धर्मं धारय, **'धारणात् धर्म इत्याहुः'**[5], मननशीलत्वं धारय, ऋषित्वं धारय, देवत्वं धारय।

उपनिषद्वाङ्मयस्य चरमं लक्ष्यमस्ति मोक्षः, निःश्रेयः। परं नोपेक्ष्यते उपनिषदृषिणा भौतिकजीवनम्। अस्मिन् संसरणशीले परिवर्तशीले असारे संसारे निवसन्नेव मानवः निःश्रेयसः सिद्धिं प्राप्नोति यतोहि मानवशरीरः तस्य अशरीरिणः आत्मनः अधिष्ठानं विद्यते – तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानम्[6] आत्मा एव शरीरस्य आधारः विद्यते।

**आत्मेन्द्रिमनोयुक्तं भोक्तेत्याहुर्मनीषिणः**[7] इन्द्रियमनोऽन्वितः आत्मा भोक्ता उच्यते। यावज्जीवः शरीरेण सह अभिन्नत्वं भजते तावदेवात्मानं सुखी दुःखी वा मनुते। वस्तुतः सुखं दुःखं च शरीरधर्मः विद्यते। शरीरस्तु मरणधर्मा अतः मृत्युना गृह्यते – **"मघवन्मर्त्यं वा इदं शरीरमात्तं मृत्युना"**[8]। भौतिकसुखाय अमुष्मिन् वाङ्मये प्रेयस् शब्दः दृश्यते। अतिशायने अर्थे ईयसुन् प्रत्यये कृते प्रेयस्शबदस्य सिद्धिर्भवति अतः अस्यार्थः भवति अतिशयेन प्रियः प्रेयः। मनुष्येभः किमतिशयेन प्रियत्वं भवति, प्रेयसः स्वरूपं कथं भवतीति छान्दोग्योपनिषदि उच्यते–

**गो अश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राण्यातनानीति**[9] गावः, हस्तयः, हिरण्यानि, अश्वाः, दासाः, भार्या, क्षेत्राणि, निवासस्थानानि एतानि भौतिकवस्तूनि मनुष्येभ्यः प्रियाणि भवन्ति यतोहि एतैः साधनैः सुखमयं भवति भौतिकजीवनम्।बृहदारण्यकोपनिषदि

---

* सहायक प्राध्यापिका, डॉ. हरीसिंह गौर विश्वविद्यालय, सागर, म.प्र.

*Emerging Researcher:* **Volume 3: Issue III: July-September 2016 ISSN : 2348-5590**

एतत् वर्णनमस्ति यत् सृष्ट्यारम्भे पुरुषः एकाकी आसीत्, सः एकाकी कथं रमेत्, भोगान् च भुञ्जीत अतस्तेन अपरमभिलषितम् ततस्तेन स्वशरीरस्य भागद्वयं कृतम्। तद्भागद्वयमेव पतिपत्नीरूपेण अभवत्।यथा चणकः द्विदलार्धः सन् एक एव भवति, तथैव पतिपत्न्या अपि भवतः–

**स वै नैव रेमे तस्मादेकाकी न रमते स द्वैतमैच्छत्। स हैतावानास यथा स्त्रीपुमांसौ संपरिष्वक्तौ स इममेवात्मानं द्वेधाऽपातयत्ततः पतिश्च पत्नी चाभवतां तस्मादिमिर्धबृगलमिव स्व इति ह स्माह याज्ञवल्क्यस्तस्मादयमाकाशः स्त्रिया पूर्यत एव तां समभवत्ततो मनुष्या अजायन्त।**'10

अतः ऐहिकसुखानन्दावाप्तये स्त्रीइत्यादीनां रचना पुरुषैः कृता। एते प्रियाः पदार्थाः, एवं च प्रियाः मनोरंजकाः पदार्थाः जीवने काम्याः भवन्ति। श्रेयसः मार्गस्य पथिकं नचिकेतां प्रलोभनाय यमेन ये भोग्यपदार्थाः प्रस्तावितास्त एव सांसारिकपदार्थाः–

**शतायुषः पुत्रपौत्रान् वृणीष्व बहून् पशून् हस्तिहिरण्यमश्वान्।**
**भूमेर्महदायतनं वृणीष्व स्वयं च जीव शरदो यावदिच्छसि।।**'11

सर्वप्रथमं तु मनुष्यः आत्मने दीर्घायुष्यं कामयते उपनिषदामपि अयमेव घोषः–**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।** कर्मकुर्वन् मनुष्यः शतायुर्भवेत्। आयुः प्राप्य सः सर्वान् भोग्यान् पदार्थान् कामयते यतोहि पुरुषः काममयो भवति – **'य एवायं काममयः पुरुषः'**12 मनसि च कामाः तथा संश्लिष्टाः भवन्ति यथा पुष्पेषु गन्धम्, तिलेषु तैलम्।परं एतत् मनस्थ काम एवासीत् यः सृष्टेरादिकारणं बभूव–**सोऽकामयत बहु स्यां प्रजायेय इति**13 ।संसरणस्य अपि हेतुः कामः। मनो हि रेतस् कामः। एष काम एव पुनर्जन्मनः हेतुः। कामना एव एषणा। सा च एषणा त्रिधा भवति–पुत्रैषणा, वित्तैषणा, लोकैषणा–

**या ह्येव पुत्रैषणा सा वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव भवतः।**'14 अर्थात् सन्तानकामः पुत्रैषणा भवति। धनादिकामना वित्तैषणा अस्ति। यशप्रतिष्ठाया कामना लोकैषणा उच्यते। प्रेयसः केन्द्रबिन्दुः एषा एषणा एव विद्यते। एताश्चैषणाः न तु कल्पनामात्रभूताः भवन्ति न च निराधाराः भवन्ति एतास्तु मानवमात्रस्य भोग्यवस्तूनि काम्यानि भवन्ति। नचिकेतार्थम् एतानि वस्तूनि मूल्यहीनानि आसन् परं सामान्यमनुष्येभ्यस्तु एतानि बहुमूल्यान्येव। अतः प्रेयसि भोक्ता, भोग्यवस्तु, भोगेच्छा एतत्त्रयमपि निहितं भवति।

परं चातोऽन्यः श्रेयमार्गः, विलक्षणः। अविद्या प्रेयस् विद्यते विद्या च श्रेयस्। एतयोः यः श्रेयस्मार्गावलम्बी भवति तस्य महत्कल्याणं भवति परन्तु यः प्रेयसं वृणीते सः लक्ष्याद्दूरीभवति। अतः श्रेयस् मनुष्यस्य विकासमार्गः विद्यते प्रेयश्च ह्रासमार्गः। श्रेयस्–प्रेयस् उभे एव मार्गे भवतः मानवानां समक्षम्, तत्र यः धीरः भवति सः सम्यक् परीक्ष्य श्रेयस्–मार्गमवलम्बते। यश्च मन्दबुद्धिः भवति सः भौतिकसुखाय प्रेयस्–मार्गं चिनुते। प्रेयस्मार्गमवलम्बमानः मनुष्यः यदि विद्यामभिलषते तर्हि सोऽत्मानं भौतिकसुखादपगमयति। श्रेयस्मार्गमवलम्बमानं पुरुषं सांसारिकभोगाः न प्रलोभयन्ति। अस्य साक्षात् प्रमाणं पक्षिद्वयेन मुण्डकोपनिषदि दृश्यते–

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**
**तयोरन्यः पिप्पलं स्वाद्वत्यनश्नन्नन्योऽभिचाकशीति।।**'15

द्वौ पक्षिणौ स्तः। तौ च सुन्दरपर्णौ स्तः। तयोश्च जीवात्मारूपी पक्षी प्रकृतिरूपिवृक्षस्य फलं स्वादेन अत्ति, सुखी दुःखी च भवति, फलभोगे आसक्तो भवति पौनःपुन्येन अभक्षणस्य संकल्पं कुर्वन्नपि तत्रैव लीनो भवति। अपरश्च पक्षी वृक्षस्य फलं अखादन् केवलं खादन्तं पक्षिणं साक्षीभावेन पश्यति। एवं च प्रकृतिरूपिवृक्षस्तु उभाभ्यां समानम्, परं वृक्षस्थितः जीवात्मा तं नैरन्तर्येण भुङ्क्ते, भोजं भोजं कदाचित् ततः विरक्तो भवति सा एव प्रवृत्तिः श्रेयस्मार्गस्य। अतः वक्तुं शक्यते यत् प्रेयस् एव पूर्ववर्ती श्रेयस्मार्गस्य। प्रेयस् मानवस्य सहजा प्रवृत्तिः।अतः प्रेयसपेक्षया श्रेयसे महान् प्रयासः आवश्यकः।

श्रेयःप्रेयसोः सामंजस्येन आत्मा परमात्मानं प्रति उन्मुखो भवति। मनुषः लक्ष्यमपि ब्रह्मानन्दस्य प्राप्तिरेव विद्यते। एतत्परमसुखमवाप्तये मनुष्यैः प्रेयः हेयमिति मत्वा ऐन्द्रिकं दैहिकं च सुखमसारं ज्ञात्वा स्वबाह्यमुखानि इन्द्रियाणि अन्तःमुखानि करणीयानि। एतत् तदैव सम्भवम् यदा मनुष्यः स्वमनसः संयमनं करोति। यतोहि 'मन एव मनुष्याणां कारणं बन्धमोक्षयोः' अर्थात् इदं मन एव विद्यते यः मनुष्यं जन्मबन्धे मोक्षे च नियोजयति। मनः वायु इव चंचलः, अस्य गतिः गहना। इन्द्रियजयार्थं मनः नियन्त्रितव्यः। यः मानवः दुराचरणं न त्यजति, यः सर्वदा अशान्तस्तिष्ठति, यस्य मनः भौतिकभोगविलासासक्तः विद्यते, यस्य च चित्तं असमाहितं विद्यते, चंचलमस्ति सः परमपदं नैवाप्तुं शक्यते–

**नाविरतो दुश्चरितान्नाशान्तो नासमाहितः।**

**नाशान्तमनसो वापि प्रज्ञानेनैनमाप्नुयात्।।**'16

कथं च एतन्मनः शान्तः भवेदिति छान्दोग्योपनिषदि उक्तम्– **आहारशुद्धौ सत्त्वशुद्धिः** '17 अर्थात् अन्नस्य पावित्र्येण मनः शुद्धं क्रियतामद्ध अन्नमयं मनः। मनसः निर्मितिरन्नेन भवति। मनुष्यभक्षितस्यान्नस्य भागत्रयं भवति – मलं मांसं मनश्च। तत्र अन्नस्य सूक्ष्मतमभागं मन विद्यते। अतः सर्वप्रथमं अन्नशुद्धिर्भवितव्या। ततः अन्नस्य शुद्धत्वेन सत्त्वशुद्धिर्भवति।-मनः निर्मलं पवित्रं च भवति।अत एव गीतायां भगवान् श्रीकृष्णः वक्ति – **युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु**।'18 तात्पर्यम् युक्ताहारविहारेण मनः नियन्त्रितं भवति।

अन्तःकरणस्य मलदोषाश्च व्यपगच्छन्ति। शंकराचार्यमतेन इन्द्रियाणां शब्दादिविषया एव आहाराः विद्यन्ते'19 अतः रागद्वेषमोहादिदोषैः असंपृष्टविषयज्ञानस्य शुद्धिरेवाहारशुद्धिः, आहारशुद्धौ च सत्त्वशुद्धिः। मनसः पवित्रेण मनसि एकाग्रताऽऽयाति चित्तैकाग्र्यमेव उपासनानां परमप्रयोजनं – परं **प्रयोजनमुपासनानां तु चित्तौकाग्र्यम्**'20 उपासना मनोव्यापाररूपा, इत्युक्तं वेदान्तसारे – **उपासनानि सगुणब्रह्मविषयमानसव्यापाररूपाणि शाण्डिल्यविद्यादीनि**21।चित्तस्यैकाग्र्यार्थम् प्रणवोपासनापि विशेषतः उल्लेखनीया विद्यते।आथर्वण ऋषिः प्रणवोपासनामुपदिशन् कथयन्ति यत् हे सौम्य! उपनिषद्रूपि महास्त्रं धनुः संगृह्य उपासनारूपशरं सन्धाय ब्रह्मरूपलक्ष्यं च संलक्ष्य वेद्धव्यम्।प्रणवोपासनायां प्रणवः धनुः विद्यते।आत्मा शरःब्रह्म च लक्ष्यम्, तत्र अप्रमत्तेन प्रमादरहितेन भूत्वा ब्रह्मरूपिलक्ष्यं वेधनीयम् तेन यथा शरः लक्ष्यमयो भवति तथैव जीवात्मा ब्रह्ममयो जायते–

**प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते।**

**अप्रमत्तेन वेद्धव्यम् शरवत्तन्मयो भवेत्।।**'22

अपि चोच्यते–

**स्वदेहमरणिं कृत्वा प्रणवं चोत्तारणिम्।**

**ध्याननिर्मथनाभ्यासात् एवं पश्येन्निगूढवत्।।**'23

अर्थात् जीवेन स्वदेहं निम्नारणिं प्रणवं च उत्तरारणिं विधाय ध्यानरूपिघर्षणेन गूढं गुप्तं ब्रह्म अग्निवत् साक्षात्क्रियेत। यदा च मानवः एवं ब्रह्मसाक्षात्काय सफलप्रयासः फलवान् च भवति तदा सः श्रेयमार्गानुगामी बोभवीति। अपि च अनित्येन नित्यं प्राप्नोति परिणामतः सः प्रेयमार्गं प्रति उदासीनो भवति।सश्च शाश्वतीं शान्तिमवाप्नोति–**तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम्**24 उपनिषद् समुपदिशति यत् तेषामेव धीराणां कृते पराकाष्ठा शान्तिः नेतरेषाम् अन्येषां कृते एष योगः। एषा एव निःश्रेयस्सिद्धिः। एतदेव परमं धाम। एषा एव परमा सम्पद्।एषा पराकाष्ठा एषा परा गतिः।यमवाप्य मनुष्यः परिपूर्णो भवति उपनिषद्वाचि च चाकथ्यते–

**पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।**

**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।**

सन्दर्भा

1. कठो० उप० 2.3
2. महा०भा० शान्तिपर्व 180.12
3. ऐत० उप० 1.2.3
4. बृहदा० उप० 2.4.5
5. बृहदा० उप० 2.4.6
6. छा० उप० 8.12.1
7. कठ० उप० 3.4
8. छा० उप० 8.12.1
9. छा० उप० 7.24.2
10. बृहदा० उप० 1.4.3
11. कठ० उप० 1.1.23

18 गीता 6.17

19 छां० उप० शां० भा० 7.26.2

20 वेदान्तसार पृ० 54

21 वेदान्त० पृ० 30

22 मु० उप० 2.2.3

23 श्वे० उप० 1.14

24 कठ० उप० 2.2.13